This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M2400

कविकुलबुरू कालिदास संस्कृत विश्वविद्याालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2400 विषय वेदांत

नाव वेदांत परिभाषा

लेखक/लिपीकार धर्मराज दीक्षित

पृठ .... काळ .... पूर्ण/~~अपूर्ण~~

M2400

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यं तात्पर्यसंशयविपर्ययोत्तरशब्दस्मानविशेषेच तात्पर्यज्ञानहेतुरेव ॥ उदवाक्यं एतत्परमेवोतान्यपरमित्तिसंशयेत
द्विपर्ययेचतदुत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्य॥ निश्चयं विनानुपपत्तेरित्याहुः ॥ तेच्चतात्पर्यविदमीमांसापरि
शोधितन्यायादेवावधार्यते ॥ लोकेतु प्रकरणादिना ॥ तत्र लौकिकवाक्यानां मानांतरावगतार्थतया अनुवादकत्वं।
वेदेतु वाक्यार्थस्यापूर्वतया नानुवादकत्वं ॥ तत्र लौकिकेवेदेच कार्यपराणामिव सिद्धार्थानामपि प्रामाण्य ॥ पुत्रस्तेजा
तइत्यादिषु सिद्धपदार्थेपिपदानां सामर्थ्यावधारणात् ॥ अतएववेदांतवाक्यानां ब्रह्मणि प्रामाण्य यथाचैतत्तद्विषय
परिच्छेदवक्ष्ये ॥ तत्रवेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमितिनैयायिकाः ॥ वेदानां नित्यत्वेन निरस्त
समस्तदूषणतया ॥ इति मध्वरमीमांसकाः ॥ अस्माकंतु मतेवेदोननित्यः ॥ उत्पत्तिमत्वात् ॥ उत्पत्तिमत्वं चास्य म
हतोभूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुतेः नापिवेदानांत्रिक्षणावस्थाइत्वं ॥ यएववेदोवेद
दत्तेनाधीतः स एवमयापि इत्यादिप्रत्यभिज्ञाविरोधात् ॥ अतएव गकारादिवर्णानामपिनक्षणिकत्वं सोयं
गकारइत्यादिप्रत्यभिज्ञाविरोधात् ॥ तथाच वर्णपदवाक्यसमुदायरूपस्य वेदस्य वियदादिसृष्टिकालीनो

प्रामाण्य

नचात

वेदांतपरिभाषा॥ पचितकृतत्वं॥ प्रलयकालीनध्वंसप्रतियोगित्वंच॥ ननुमध्येवर्णानामुत्पत्तिविनाशोवानंतगकारकल्पनायांगो
रवात्॥ अनुच्चारणदशायांवर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यंजकाभावान्नविरुध्यते॥ अधकार
स्थघटानुपलंभवत्॥ उत्पन्नोगकारइत्यादिप्रत्ययस्तुसोयंगकारइतिप्रत्यभिज्ञाविरोधादप्रमाणं॥ तस्मान्न रो
४२ वेदानांक्षणिकत्वं॥ ननुक्षणिकत्वाभावेपिवियदादिप्रपंचवदुत्पत्तिमत्वेनपरमेश्वरकर्तृकत्वेनापौरुषेय
त्ववेदानामितितवसिद्धांतोभज्यतेतिचेन्न॥ नपुरुषे[illegible]णोच्चार्यमाणत्वंपौरुषेयत्वं॥ गुरुमतेपिअध्या
पकपरंपरयापौरुषेयत्वापत्तेः॥ नापिपुरुषाधीनोत्पत्तिमत्वंपौरुषेयत्वं॥ नैय्यायिकाभिमतेपौरुषे
यत्वानुमानेस्मदादिनासिद्धसाधनतापत्तेः किंतुसजातीयोच्चारणानपेक्षोच्चारणविषयत्वं॥ तथाच॥ सर्गा
द्यकालेपरमेश्वरःपूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकंवेदंविरचितवान्॥ ननुतद्विजातीयंवेदमिति
नसजातीयोच्चारणानपेक्षोच्चारणविषयत्वंपौरुषेयत्वं॥ भारतादीनांतुसजातीयोच्चारणमनपेक्ष्यै
वोच्चारणमितितेषांपौरुषेयत्वंएवंपौरुषेयत्वापौरुषेयभेदेनागमोद्विधानिरूपितः॥ वेदांतपरिभाषायमाग ॥१४॥

रामः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नपरिच्छेदः ॥ उक्तानीमार्थापत्तिर्निरूप्यते तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः ॥ तत्रोपपाद्यज्ञानं करणं
उपपादकज्ञानं फलं ॥ येन विना यदनुपपन्नं तत्तत्रोपपाद्यं ॥ यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकं ॥ यथा रात्रिभो   न
जनेन विना दिवा अभुंजानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपाद्यं ॥ यथा रात्रिभोजनस्याभावे तादृशपीन
त्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकं रात्रिभोजनकल्पनारूपायां प्रमितावर्थस्यापत्तिः कल्पनेति षष्ठीसमासे
नार्थापत्तिशब्दो वर्तते ॥ कल्पनाकरणे पीनत्वादिज्ञानेऽर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहिसमासेन वर्तते
इति फलकरणयोरुभयोस्तत्प्रयोगः ॥ सा चार्थापत्तिर्द्विविधा ॥ दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ॥ दृष्टार्थापत्ति
र्यथा ॥ इदं रजतमिति रजतस्य सद्भिन्नत्वं ॥ सत्त्वासत्त्वाभाववत्त्वं वा मिथ्यात्वं कल्पयति ॥ श्रुतार्थापत्तिर्यथा ॥ यत्र श्रू
यमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनं ॥ यथा तरति शोकमात्मविदित्यत्र श्रुतस्य शोकशब्दवाच्य
५ बंधजातस्य ज्ञाननिवर्त्यत्वस्यानुपपत्त्या बंधस्य मिथ्यात्वं कल्प्यते ॥ यथा जीवी देवदत्तो गृहे नेति वाक्यश्रव
णानंतरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयति ॥ श्रुतार्थापत्तिर्द्विधा ॥ अभिधानानुपपत्तिरभिहिता
४ नुपपत्तिश्च प्रतिपन्नस्य रजतजातीयस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेनुपपन्नमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदांतपरिभाषा०॥ नुपपत्तिश्च ॥ तत्र यत्र वाक्यैकदेशश्रवणेन्वयाभिधानानुपपत्त्यान्वयाभिधानोपयोगिपदान्तरं कल्प्यते ॥ तत्राभिधानानु

या पपत्तिर्यथा ॥ द्वारमित्यत्र पिधेहि इत्यध्याहारः ॥ यथा वा विश्वजिता यजेतेत्यत्र स्वर्गकामपदाध्याहारः ॥ ननु द्वा

३५ रमित्यादावन्वयाभिधानात्पूर्वमिदमन्वयाभिधानमपिधानोपस्थापकपदं विनानुपपन्नमिति कथं ज्ञानमिति चेन्न ॥

अभिधानपदेन पदेन करणव्युत्पत्त्या तात्पर्यस्य विवक्षितत्वात् ॥ तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पि

धानोपस्थापकपदं विनानुपपन्नमिति ज्ञानं तत्रापि संभाव्यते ॥ अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोर्थोनु

पपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्र द्रष्टव्या ॥ यथा स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यत्र स्वर्गसाध

नत्वस्य क्षणिकयागानुगततयावगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते ॥ नन्वेयमर्थापत्तिरनुमानेनो

तरभवितुमर्हति ॥ अन्वयव्याप्त्यज्ञानेनान्वयिनानं न संभवात् ॥ व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तं

अत एवार्थापत्तिस्थलेनुमिनोमीति नानुव्यवसायः ॥ किं तु अनेनेदं कल्पयामीति ॥ ननु अर्थापत्तिस्थले

इदमनेन विनानुपपन्नमिति ज्ञानं करणमित्युक्तं ॥ तत्र किमिदं तेन विनानुपपन्नत्वं ॥ तदभावव्यापकाभावा ॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावप्रतियोगित्वमिति ब्रूमः॥ एवमर्थापत्तेर्मानांतरत्वसिद्धौ व्यतिरेकीनानुमानांतरं॥ पृथिवीतरेभ्यो भिद्यते इत्यत्र गंधवत्त्वमित
रभेदं विनानुपपन्नमित्यादि ज्ञानस्य कारणत्वात्॥ अतएवानुव्यवसायः॥ पृथिव्यामितरभेदं कल्पयामीति॥ इति वेदांत
परिभाषायामर्थापत्तिपरिच्छेदः॥ इदानीं षष्ठं प्रमाणं निरूप्यते॥ ज्ञानकरणाजन्याभावानुभवासाधारणकारणम
नुपलब्धिरूपप्रमाणं॥ अनुमानजन्यातींद्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणाय जन्यांतं॥ अदृष्टादौ साधा
रणकारणेऽतिव्याप्तिवारणायासाधारणेति॥ अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणायानुभवेतिवि
शेषणं॥ न चाभावानुमितिस्थलेप्यनुपलब्धेर्वाभावो गृह्यतां विशेषाभावादिति वाच्यं॥ धर्माधर्माद्यनुपलब्धि
सत्वेपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात्॥ ननु केयं योग्यानुपलब्धिः किं योग्यस्य प्रतियो
गिनोऽनुपलब्धिः उत योग्येऽधिकरणे प्रतियोग्यनुपलब्धिः॥ नाद्यः स्तंभे पिशाचादिभेदस्याप्रत्यक्षतापत्तेः॥ नां
त्यः आत्मनि धर्माधर्मस्यापि प्रत्यक्षतापत्तेरिति चेन्न॥ योग्या चासावनुपलब्धिश्चेति कर्मधारयाश्रयणात्॥ अ
नुपलब्धेर्योग्यता च॥ भाव तर्कितप्रतियोगिसत्वप्रसंजितप्रतियोगिकत्वं॥ यस्याभावो गृह्यते तस्य यः प्रतियोगी
तस्य सत्वेनाधिकरणे तर्कितेन प्रसंजनयोग्यमापादनयोग्यं यत्प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलंभस्य तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनुपलब्धेर्योग्यत्वमित्यर्थः॥तथाहि॥स्फीतालोकवतिभूतले यदिघटः स्यात्तर्हि घटोपलंभः स्यादित्यापादनसंभवात्ताद
शभूतले घटाभावोनुपलब्धिगम्यः॥अंधकारेतु तादृशापादनाभावान्नानुपलब्धिगम्यता॥ स्तंभेपिशाचत्वसत्वेस्तंभ
त्ववत्प्रत्यक्षतापत्त्यातदभावोनुपलब्धिगम्यः॥आत्मनि धर्मादिसत्वेप्यस्यातींद्रियत्वयानिरुक्तसंनिकर्षोपलंभापा
दनासंभवान्नधर्माद्यभावस्यानुपलब्धिगम्यत्वं॥ ननूक्तरीत्याधिकरणेंद्रियसंनिकर्षस्थले अभावस्यानुपल
ब्धिगम्यत्वंतवानुमतं॥तत्रक्लृप्तेंद्रियमेवाभावाकारवृत्तावपिकरणंइंद्रियान्वयव्यतिरेकानुविधानादितिचेन्न॥
प्रतियोग्यनुपलब्धेरपि अभावग्रहेहेतुत्वेनक्लृप्तत्वेनकरणत्वमात्रस्यकल्पनात्॥ इंद्रियस्य चाभावेनसमं
संन्निकर्षाभावेनाभावग्राहाहेतुत्वात्॥इंद्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपलक्षणत्वेनान्यथासि
द्धेः॥ननुभूतले घटोनेत्याद्यभावानुभवस्थले भूतलांशेप्रत्यक्षत्वमुभयवादिसिद्धं इतितत्रवृत्तिनिर्गमन
स्यावश्यकत्वे भूतलावच्छिन्नचैतन्यवत्तन्निष्ठघटाभावावच्छिन्नस्यापिप्रमात्रभिन्नतया घटाभावस्य
प्रत्यक्षतेवसिद्धांतेपीतिचेत्॥सत्यं अभावप्रतीतेः प्रत्यक्षत्वेपितत्करणस्यानुपलब्धेर्मानांतरत्वात्॥
नहिफलीभूतज्ञानप्रत्यक्षत्वेतत्करणस्यप्रत्यक्षप्रमाणनियतत्वमस्ति॥दशमस्त्वमसीत्यादिवाक्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्यत्वानस्यप्रत्यक्षत्वेपिनत्करणवाक्यस्यप्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात्॥फलवैजात्यंविनाकथंप्रमाणभे
दइतिचेन्न॥वृत्तिवैजात्यमात्रेणप्रमाणवैजात्योपपत्तेः॥तथाचघटाभावाकारवृत्तिर्नेंद्रियजन्या॥इंद्रियस्याविषयेणा
संनिकर्षात्॥किंतुघटानुपलब्धिरूपमानांतरजन्येतिभवत्यनुपलब्धेर्मानांतरत्वं॥नन्वनुपलब्धेर्मानांतरपक्षे
ऽप्यभावप्रतीतेःप्रत्यक्षत्वेघटवतिघटाभावभ्रमस्यापिप्रत्यक्षत्वापत्तौतत्रापनिर्वचनीयघटाभावोऽभ्युपगम्यतां॥
नचेष्टापत्तिः॥तस्यमायोपादानकत्वेभावत्वानुपपत्तेः॥मायोपादानकत्वेभावेमायायाःसकलकार्योपादानक
त्वानुपपत्तिरितिचेन्न॥घटवतिघटाभावभ्रमोनतत्कालोत्पन्नघटाभावविषयकः॥किंतुभूतलरूपाधिष्ठानविद्यमा
नोलौकिकोघटाभावोभूतलेआरोप्यतइति अन्यथाख्यातिरेव॥आरोप्यसंनिकर्षस्थलेसर्वत्रान्यथाख्यातेर
वव्यवस्थानात्॥अस्तुवाप्रतियोगिमतितदभावभ्रमस्थलेतदभावस्यानिर्वचनीयत्वं॥तथापितदुपादानंमायै
वनह्युपादानोपादेययोरत्यंतसाम्यं जात्यं॥तंतुपटयोरपितंतुत्वपटत्वादिनावैजात्यात्॥यत्किंचित्साजात्य
स्यमायायाःअनिर्वचनीयस्यघटाभावस्यचमिथ्यात्वधर्मस्यविद्यमानत्वात्॥अन्यथाव्यावहारिकघटा
भावंप्रतिकथंमायोपादानकत्वमितिकुतोनाशंकेथाः॥नचविजातीययोरपिउपादानोपादेयभावेब्रह्मैवजग

दुपादानं स्यादितिवाच्यं॥ प्रपंचविभ्रमाधिष्ठानत्वरूपस्य तस्येष्टत्वात्॥ परिणामित्वरूपस्योपादानस्य निरवयवे ब्र
ह्मण्यनुपपत्तेः॥ तथा च प्रपंचस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धांत इत्यलमतिप्रसंगेन॥ स चाभावश्चतु
र्विधः॥ प्रागभावः प्रध्वंसाभावोत्यंताभावोन्योन्याभावश्चेति॥ मृत्पिंडादौ कारणे कार्यस्य घटादेरुत्पत्तेः॥ पूर्वं यो
भावः स प्रागभावः॥ स च भविष्यतीति प्रतीतिविषयः॥ तत्रैव घटस्य मुद्गरपातानंतरं योभावः स प्रध्वंसाभावः
ध्वंसस्यापि स्वाधिकरणकपालनाशे नाशश्च॥ न च घटोन्मज्जनापत्तिः॥ ध्वंसध्वंसस्यापि घटप्रतियोगिक
ध्वंसत्वात्॥ अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः॥ न चैवमपि यत्र ध्वंसा
धिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यं॥ तादृशमधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसि
द्धं॥ ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यतायाः वक्ष्यमाणत्वात्॥ यदि च ध्वंसाधिकरणं चैतन्यं तदासि
द्धेः॥ आरोपितप्रतियोगिकध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात्॥ तदुक्तं॥ अधिष्ठानावशे
षो हि नाशः कल्पितवस्तुन इति॥ एवं शुक्तिरूप्यविनाशोपीदमवच्छिन्नचैतन्यमेव॥ यत्राधिकरणे यस्य
कालत्रयेप्यभावः सोत्यंताभावः॥ यथा वायौ रूपात्यंताभावः॥ सोपि वियदादिवत्ध्वंसप्रतियोग्येव॥ इदमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ अधिकरणस्यानादित्वे नादिः यथा जीवे ब्रह्मभेदः

दं नेतिप्रतीतिविषयो न्योन्याभावः॥ अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रीयते॥ भेदातिरिक्तपृथक्त्वादौ प्रमा
णाभावात्॥ अयं चान्योन्याभावो अधिकरणस्य सादित्वे सादिः॥ यथा घटे पटभेदः॥ द्विधापि भेदो ध्वंसप्रति
योग्येव॥ अविद्यानिवृत्तौ तत्परतंत्राणां निवृत्त्यवश्यंभावात्॥ पुनरपि भेदो द्विविधः॥ सोपाधिको निरुपाधि
कश्चेति॥ तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं॥ तच्छून्यत्वं निरुपाधिकत्वं॥ तत्राद्यो यथा॥ एकस्यैवा
काशस्य घटाद्युपाधिभेदेन भेदः॥ यथैकस्य सूर्यस्य जलभाजनभेदेन भेदः॥ यथा चैकस्यैव ब्रह्मणो तःक
रणभेदाद्भेदः॥ निरुपाधिकभेदो यथा॥ घटे पटभेदः॥ न च ब्रह्मण्यपि प्रपंचभेदाभ्युपगमे द्वैतविरोधः॥
न तात्विकभेदादेरभ्युपगमेन वियदादिवद्द्वैताव्याघातात्॥ तदुक्तं सुरेश्वराचार्यैः॥ अक्षमा भवतः केयं सा
धकत्वप्रकल्पने॥ किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितमिति॥ अत एव विवरणे अविद्यानुमाने प्राग
भावव्यतिरिक्तत्वं विशेषणं॥ तत्वप्रदीपिकायां॥ अविद्यालक्षणे भावे विशेषणं संगच्छते॥ एवं चतुर्वि
धाभावानां योग्यानुपलब्ध्या प्रतीतिः॥ तत्रानुपलब्धिर्मानांतरं॥ एवमुक्तानां प्रमाणानां प्रामाण्यं स्व
एवोत्पद्यते। ज्ञायते च॥ तथा हि॥ स्मृत्यनुभवसाधारणं संवादप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं
प्रमाण्य। ज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्य निवर्त्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योग्यत्वं स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्वे दोषवशेनाग्रहात् असंशयानुपपत्तिः॥ अप्रामाण्यं तु न ज्ञानसामा
न्यसामग्री। अयोऽयं प्रमायामप्यप्रामाण्यापत्तेः किंतु दोषप्रयोज्यं नाप्यप्रामाण्ययावत्स्वाश्रयग्राहकग्राह्यं अ
॥२९॥ प्रामाण्यत्वं॥ तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं॥ न त्वधिकगुणमपेक्षते॥ प्रामाण्यमात्रे ऽनुगतगुणाभावात्॥ नापि
प्रत्यक्षप्रमायां भूयोवयवेंद्रियसंन्निकर्षः॥ रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात्॥ सत्यपि तस्मिन्पीतः
शंख इति प्रत्यक्षस्य भ्रमत्वाच्च॥ अत एव न सल्लिंगपरामर्शादिकमप्यनुमित्यादिप्रमायां गुणः॥ असल्लिंग
परामर्शादिस्थलेपि विषयाबाधेनानुमित्यादेः प्रमात्वात्॥ न चैवमप्रमापि प्रमा स्यात्॥ ज्ञानसामान्यसा
मग्र्यविशेषादिति वाच्यं॥ दोषाभावस्यापि हेतुत्वांगीकारात्॥ न चैवं परतस्त्वं॥ आगंतुकभावकारणापे
क्षायामेव परतस्त्वात्॥ ज्ञायते च प्रामाण्यं स्वतः॥ स्वतोग्राह्यत्वं च दोषाभावे सति यावत्स्वाश्रयग्राहक
सामग्रीग्राह्यत्वं॥ स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतप्रामाण्यं
गृह्यते॥ न चैवं प्रामाण्यसंशयानुपपत्तिः॥ तत्र संशयानुरोधेन दोषस्यापि सत्वेन दोषाभावघटित
स्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्याग्रहात्॥ यद्वा यावत्स्वाश्रयग्राहकग्राह्यत्वं प्रामाण्यघट
कतदभावत्वादेर्वृत्तिज्ञानानुपनीतत्वेन साक्षिणा गृहीतुमशक्यत्वात्॥ विसंवादिप्रवृत्त्यादिलिंगका
नुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति॥ इत्यनुपलब्धिपरिच्छेदः॥ ॥एवं नि
॥२९॥

रूपितानां प्रमाणानां प्रामाण्यं द्विविधं ॥ व्यावहारिकतत्वावेदकत्वं पारमार्थिकतत्वावेदकत्वं चेति ॥ तत्र ब्रह्मस्वरूपावगाहि
प्रमाणव्यतिरिक्तानां सर्वप्रमाणानां आद्यं प्रामाण्यं ॥ तद्विषयाणां व्यवहारदशायां बाधाभावात् ॥ द्वितीयं जीवब्रह्मैक्यप
राणां सदेव सोम्येदमग्र आसीदित्यादीनां तत्त्वमसीत्येतानां ॥ तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात् ॥ त
त्रैक्यं तत्वं पदार्थज्ञानाधीनमिति प्रथमं तत्पदार्थो लक्षणप्रमाणाभ्यां निरूप्यते ॥ तत्र लक्षणं द्विविधं ॥ स्वरूपलक्षणं त
टस्थलक्षणं चेति ॥ तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणं ॥ यथा सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र सत्यादिकं स्वरूपलक्षणं
ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणमिति चेन्न ॥ स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्षणत्वसंभवात् ॥ याध
तदुक्तं ॥ आनंदो विषयानुभवो नित्यत्वं चेति संति धर्माः ॥ अपृथक्त्वेपि चैतन्यात्पृथगिवावभासंत इति ॥ तटस्थ
लक्षणं नाम ॥ यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्त्तकं तदेव ॥ यथा गंधवत्त्वं पृथिवीलक्षणं ॥ महाप्रलये
परमाणुषु उत्पत्तिकाले घटादिषु गंधाभावात् ॥ प्रकृते च जगज्जन्मादिकारणत्वं ॥ तत्र जगत्पदेन कार्यजातं
विवक्षितं कारणत्वं च कर्तृत्वं अतो विद्यादौ नातिव्याप्तिः ॥ कर्तृत्वं चैतत्तदुपादानगोचरापरोक्षज्ञानचिकी
र्षाकृतिमत्त्वं ॥ ईश्वरस्य तावदुपादानगोचरापरोक्षसद्भावे च यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः ॥ तस्माद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।१९।।

तद्ब्रह्म नामरूपमन्नं च जायते इत्यादि श्रुतिर्मानं।। तादृशचिकीर्षासद्भावे सोकामयत बहुस्यां प्रजायेयेति श्रुतिर्मानं।। ता
दृशीकृतौ च तन्मनो कुरुतेत्यादि वाक्यं।। ज्ञानेच्छाद्यन्यतमगर्भलक्षणत्रितयमिदं विवक्षितं।। अन्यथा व्यर्थविशेषणत्वा
पत्तेः।। अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणप्रवेशः।। एवं च लक्षणानि नव संपद्यंते।। ब्रह्मणि जगज्जन्मा णो
दिकारणत्वे च।। यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति इति श्रुतिर्मानं।। यद्वा नि
खिलजगदुपादानत्वं ब्रह्मणो लक्षणं।। उपादानत्वं च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणममानमायाधि
धिष्ठानत्वं वा।। एतादृशमेवोपादानत्वमभिप्रेत्य इदं सर्वं यदयमात्मा।। सच्च त्यच्चाभवत्।। बहुस्यां प्रजायेयेत्यादि
श्रुतिषु ब्रह्मप्रपंचयोस्तादात्म्यव्यपदेशः।। घटः सन् घटो भाति घट इष्ट इत्यादि लौकिकव्यपदेशोपि सच्चिदानंद
रूपब्रह्मैक्याध्यासात्।। घटादेरिष्टत्वव्यवहारे दुःखस्यापि तन्ना ध्यासात्तत्रापीष्टत्वादिव्यवहारापत्तिरिति चेन्न
असेपेसति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमेन दुःखादौ सच्चिदंध्यासेप्यानंदांशाध्यासा
भावात्।। जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसंबंधा त्।। (शा) लदुक्तं।। अस्ति भा
ति प्रियं रूपं नामस्त्यं चेत्यंशपंचकं।। आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयं।। ।।अथ जगतो जन्मनिरूप्यते।।

नेन्चानंदात्मकचिदध्यासात पित

।।१९।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतैश्च सत्वगुणोपेतैः पंचभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पंचेंद्रियाणि

सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपंचवैचित्र्यहेतुप्राणिकर्मसहकृतो अपरिमितानिरूपितशक्तिविशिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपंचं बुद्धावाकलय्येदं करिष्यामीति संकल्पयति ॥ तदैक्षत बहुस्यां प्रजायेयेत्यादिश्रुतेः ॥ ततः आकाशादीनि पंचभूतान्यपंचीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यंते ॥ तत्राकाशस्य शब्दो गुणः ॥ वायोस्तु शब्दस्पर्शौ ॥ तेजसस्तु शब्दस्पर्शरूपाणि ॥ अपां च शब्दस्पर्शरूपरसाः । पृथिव्यास्तु शब्दस्पर्शरूपरसगंधाः ॥ न तु शब्दस्याकाशमात्रगुणत्वं ॥ वाय्वादेरपि तदुपलंभात् ॥ न चासौ भ्रमः बाधकाभावात् ॥ इमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि ॥ मनोबुध्यहंकारचित्तानि च जायंते ॥ श्रोत्रादीनां पंचानां क्रमेण दिग्वातार्कवरुणाश्विनो धिष्ठातृदेवताः ॥ मनआदीनां चतुर्णां चंद्राच्युतचतुर्मुखशंकराः ॥ अधिष्ठातृदेवताः ॥ एतैरेव रजोगुणोपेतैः पंचभूतैर्यथाक्रमं वाक्पाणिपादपायूपस्थाख्यानि कर्मेंद्रियाणि जायंते ॥ तेषां च क्रमेण वह्नींद्रोपेंद्रमृत्युप्रजापतयो धिष्ठातृदेवताः ॥ रजोगुणोपेतैः पंचभूतैरेव पंच प्राणापानव्यानोदानसमानाख्या जायंते ॥ तत्र प्राग्गमनवान्वायुः प्राणः । नासादिस्थानवर्ती ॥ विष्वग्गमनवान् व्यानः अखिलशरीरवृत्ति ॥ ऊर्ध्वगमनवानुत्क्रमणवायुः उदानः कंठस्थानवर्ती ॥ अशितपीतान्नादिसमीकरणः समानः ॥ नाभिस्थानवर्ती ॥ तैरेव तमोगुणोपेतैर पंचीकृतभूतैः पंचीं

अथाग्गमनवानपानः पाय्वादिस्थानवर्ती

कृतभूतैः पंचीकृतभूतानि जायंते॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति श्रुतेः॥ पंचीकरणोपलक्षणार्थत्वात्॥ पंचीकरण
प्रकारश्चेत्थं॥ आकाशादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु योजनं॥
एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्यैषां चतुर्णामंशानां आकाशादिषु योजनं एवं तेजोबुभूमी[illegible]ना
मपि॥ तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धांतरं चतुर्विधभूतमयमिति॥ पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्य
वहारः॥ तदुक्तं वैशेष्यात्तु तद्वादस्तद्वाद इति॥ पूर्वोक्तैरपंचीकृतभूतैर्लिंगशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यंतस्था
यि मनोबुद्धिभ्यामुपेतं ज्ञानेंद्रियपंचककर्मेंद्रियपंचकप्राणपंचकसंयुक्तं जायते॥ पंच प्राणमनोबुद्धिदशेंद्रियसम
न्वितं॥ अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं इति॥ तच्च द्विविधं॥ परमपरं च॥ परं हिरण्यगर्भशरीरं॥ अपरम
स्मदादिलिंगशरीरं॥ तत्र हिरण्यगर्भलिंगशरीरं महत्तत्वं॥ अस्मदादिलिंगशरीरं अहंकार इत्युच्यते॥ एवं तमो
गुणयुक्तेभ्यः पंचीकृतभूतेभ्यो भूम्यंतरिक्षस्वर्गमहर्जनस्तपः सत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलपाताल
वितलसुतलतलातलरसातलमहातलाख्याधोलोकसप्तकस्य ब्रह्मांडस्य जरायुजांडजस्वेदजोद्भिजाख्यचतु
र्विधस्थूलशरीराणामुत्पत्तिः॥ तत्र जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि॥ अंडजानि अंडेभ्यो जाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निपक्षिपन्नगादिशरीराणि॥ स्वेदजानि तु स्वेदाज्जातानि यूकामशकादीनि॥ उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादीनि॥ तृणा
दीनामपि पापफलभोगायतनत्वेन शरीरत्वं॥ तत्र परमेश्वरस्य प्रपंचे तन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिंगशरीरोत्पत्तौ
हि स्थूलसर्गात् स्थूलसृष्टौ सत्तौ च साक्षात्कर्तृत्वं॥ इतरनिखिलप्रपंचोत्पत्तौ च हिरण्यगर्भादिद्वारा हंताहमिमास्तिस्रो देव
ता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेः॥ हिरण्यगर्भो नाम मूर्त्तित्रयादन्यः प्रथमो जीवः स वै शरी
री प्रथमः स वै पुरुष उच्यते॥ आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य इत्यादिश्रुतेः॥ एवं
तु भौतिकसृष्टिर्निरूपिता॥ इदानीं प्रलयो निरूप्यते॥ प्रलयो नाम त्रैलोक्यविनाशः॥ स च चतुर्धा॥ नित्यः प्राकृतो नैमित्तिक
आत्यंतिकश्चेति॥ तत्र नित्यः प्रलयः सुषुप्तिः तस्याः सकलकार्यप्रलयरूपत्वात्॥ धर्माधर्मपूर्वसंस्काराणां च तदा कारणा
त्मनावस्थानं तेन सुषुप्तावपि तस्य न सुखदुःखाद्यनुभवानुपपत्तिः॥ न वा स्मरणानुपपत्तिः॥ न च सुषुप्तावंतःकरणस्य वि
नाशे तदधीनप्राणनादिक्रियानुपपत्तिः॥ वस्तुतः श्वासाद्यभावेपि तदुपलब्धेः पुरुषांतरविभ्रममात्रत्वात्॥ सुप्तश
रीरोपलंभवत्॥ न चैवं सुप्तस्य परेतादविशेषः॥ सुप्तस्य हि लिंगशरीरं संस्कारात्मनात्रैव वर्त्तते॥ परेतस्य तु लोकां
तर इति वैलक्षण्यात्॥ यद्वांतःकरणस्य द्वे शक्ती॥ ज्ञानशक्तिः क्रियाशक्तिश्चेति॥ तत्र ज्ञानशक्तिविशिष्टांतःकरण
स्य सुषुप्तौ विनाशः॥ न क्रियाविशिष्टस्येति प्राणाद्यवस्थानं अविरुद्धं॥ यदा सुप्तः स्वप्नं न कंचन पश्यति॥ अथास्मिन्प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥

णएवैकधा भवति अथैनं वाकू सर्वैर्नामभिस हाप्येति सता सोम्य तदा संपन्नो भवति ॥ स्वमपीतो भवति इत्यादिश्रुतिरुक्तसुषुप्तौ मानं ॥
प्राकृतः प्रलयस्तु कार्यब्रह्म विनाशनिमित्तकः सकलकार्यनाशः ॥ यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्मांडाधि
कारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परमामुक्तिः ॥ तदा स्वर्लोकवासिनामपि उत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा
सह विदेहकैवल्यं ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति परं पदमिति श्रुतेः ॥ एवं स्वर्लोकवासि
भिः सह कार्यब्रह्मणि मुच्यमाने तदाधिष्ठितब्रह्मांडतदंतर्वर्ति निखिललोकतदंतर्वर्ति स्थावरादीनां भौतिकानां च प्रकृतौ मा
यायां लयः ॥ न तु ब्रह्मणि बोधरूप विज्ञानाशस्यैव ब्रह्मनिष्ठत्वात् ॥ अतः प्राकृत इत्युच्यते ॥ कार्यब्रह्मणो दिवसावसाननिमित्त
कः ॥ त्रैलोक्यमात्र प्रलयः ॥ नैमित्तिकः प्रलयः ॥ ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितकालः ॥ चतुर्युगसहस्रं तु ब्रह्मणो दिनमु
च्यते ॥ प्रलयकालो दिवसकालपरिमितः ॥ रात्रिकालस्य दिवसतुल्यत्वात् ॥ प्राकृतप्रलये नैमित्तिकप्रलये पुराणवचनानि ॥
द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्प्यंते प्रलयाय हि ॥ एष प्राकृतिको राजन्प्रलयो यत्र लीयते इति व
चनं प्राकृतप्रलये मानं ॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेते नंतासने नित्यमात्मसात्कृत्य चाखिलं इति वच
नं नैमित्तिकप्रलये मानं ॥ तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः ॥ स चैकजीववादे युगपदेव ॥ नानाजीववा
दे क्रमेण सर्वे एकी भवंति इति त्यादिश्रुतेः ॥ तत्राद्यास्त्रयोपि लयाः कर्मोपरतिनिमित्ताः ॥ तुरीयस्तु ज्ञानोदयनिमित्तः ॥ अ

शिवाय०
॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वानेन सहैवेति दोषः॥ एवं चतुर्विधः प्रलयो निरूपितः॥ तस्येदानीं क्रमो निरूप्यते॥ भूतानां भौतिकानां च कारणलयक्रमे पौर्लयः॥
कारणलयसमये कार्याणामाश्रयांतराभावेनावस्थानानुपपत्तेः॥ सृष्टिक्रमविपरीतक्रमेण तत्कार्यनाशे तज्जनकादृष्टनाश
स्यैव प्रयोजकत्वयाउपादाननाशस्याप्रयोजकत्वात्॥ अन्यथान्यायमते महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशा
पत्तेः॥ तथा च पृथिव्या अप्सु अपां तेजसि तेजसो वायौ वायोराकाशे आकाशस्य जीवाहंकारे तस्य हिरण्यगर्भाहंकारे तस्य चावि
द्यायां इत्येवंरूपः प्रलयः॥ तदुक्तं विष्णुपुराणे॥ जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते॥ तेजस्यापः प्रलीयंते तेजो वायौ प्र
लीयते॥ वायुश्च प्रलीयते व्योम्नि तच्चाव्यक्ते प्रलीयते॥ अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते॥ इति एवंविधकारणत्वं तस्य
दार्थस्य ब्रह्मणः तटस्थलक्षणं॥ ननु वेदांतैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सप्रपंचं ब्रह्म स्यात्॥ अन्यथा सृष्टिवाक्यानां
भा अप्रामाण्यापत्तेरिति चेन्न॥ न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यं किंतु अद्वैते ब्रह्मण्येव॥ तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः॥ इति सृ
ष्टिमनुपन्यस्य प्रपंचस्य निषेधो ब्रह्मणि प्रतिपाद्येत तदा ब्रह्मणि प्रतिषिद्धप्रपंचस्य वायौ प्रतिषिद्धरूपस्येव ब्रह्मणोन्यत्राव
स्थानशंकायां निर्विचिकित्समद्वितीयत्वं प्रतिपादितं न स्यात्॥ ततः सृष्टिवाक्याद् दृष्टोपादेयत्वसाम्येन सत्युपादानं विना कार्यस्या
न्यत्र सद्भावशंकायाः निरस्ततया नेति नेतीत्यादिना ब्रह्मण्यपि तस्यासत्वोपपादनेन प्रपंचस्य तुच्छत्वावगमे निरस्तनिखिलद्वै
तत्वमखंडं सच्चिदानंदैकरसं ब्रह्म सिध्यतीति परंपरया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्यं उपासनाप्रकरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पठितसगुणब्रह्मवाक्यानां चोपासनविध्यपेक्षितसगुणारोपमात्रपरत्वात्॥ नगुणपरत्वं॥ अद्वितीयब्रह्मप्रतिपादनेन विरुध्यते॥ तदेवं वेक्षितनिषे
स्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिंबितमिति केचित्॥ तेषामयमाशयः॥ जीवपरमेश्वरसाधारणं ध्यसंपादक
चैतन्यमात्रं बिंबं तस्यैव बिंबस्याविद्यात्मिकायां मायायां प्रतिबिंबमीश्वरचैतन्यं॥ अंतःकरणेषु प्रतिबिंबं जीवचैतन्यं॥ कार्यो त्वेन विनियो
पाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुतेः॥ एतन्मते जलाशयगतशरावगतसूर्यप्रतिबिंबयोरिव जीवपरमेश्वरयोर्भेदः॥ गः इति न किं
अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वं॥ अंतःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि चिदप्यवाद्यं
जीव परिच्छिन्नत्वं॥ एतन्मते अविद्याकृतदोषा ईश्वरपरमेश्वरेपि स्युः॥ उपाधेः प्रतिबिंबपक्षपातादित्यस्वरसात्॥ बिंबात्मकमीश्वर
चैतन्यमपरे॥ तेषामयमाशयः॥ एकमेव चैतन्यं बिंबत्वाक्रांतं ईश्वरचैतन्यं प्रतिबिंबत्वाक्रांतं जीवचैतन्यं॥ बिंबप्रतिबिंब
कल्पनोपाधिरेकजीववादे अविद्या॥ अनेकजीववादे अंतःकरणान्येवा अविद्यांतःकरणरूपोपाधिप्रयुक्तजीवपरभेदः॥
उपाधिकृतदोषाश्च प्रतिबिंबे जीव एव वर्तंते॥ न तु बिंबपरमेश्वरे॥ उपाधेः प्रतिबिंबपक्षपातित्वात्॥ एतन्मते च गगनसू
र्यस्य जलादौ भासमानप्रतिबिंबसूर्यस्येव जीवपरयोर्भेदः॥ न तु ग्रीवास्थस्य मुखस्य दर्पणप्रदेश इव बिंबचैतन्यस्य परमे
श्वरस्य जलादौ प्रतिबिंबत्वे बिंबभूतमहाकाशस्यापि जलादिप्रदेशसंबंधदर्शनेन परिच्छिन्नबिंबस्य प्रतिबिंबदेशासंबं
धित्वेपि अपरिच्छिन्नब्रह्मप्रतिबिंबस्य प्रतिबिंबदेशसंबंधाविरोधात्॥ न च रूपहीनस्य ब्रह्मणो न प्रतिबिंबसंभवः॥ रूपवत
मीनप्रदेशे आभासीनस्य सर्वांतर्यामित्वं न स्यात् इति चेन्न॥ साक्ष्य मनसगनस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतथात्वदर्शनात् इति वाच्यं ॥ निरूपस्यापि रूपस्य प्रतिबिंबदर्शनात् ॥ नन्वनीरूपस्य द्रव्यस्य प्रतिबिंबाभाव नियमः ॥ आत्मनो द्र
व्यत्वाभावस्योक्तत्वात् ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥ यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् इत्यादि
नानावाक्येन ब्रह्मप्रतिबिंबानुमानस्य बाधितत्वात् ॥ तदेवं तत्पदार्थो निरूपितः ॥ इदानीं त्वंपदार्थो निरूप्यते ॥ एकजीववादे अवि
द्याप्रतिबिंबो जीवः ॥ अनेकजीववादे अंतःकरणप्रतिबिंबः ॥ स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् ॥ तत्र जाग्रद्दशा नाम इंद्रि
यजन्यज्ञानावस्था ॥ अवस्थांतरे इंद्रियजन्यज्ञानाभावान्नातिव्याप्तिः ॥ इंद्रियजन्यज्ञानं चांतःकरणवृत्तिः ॥ स्वरूपज्ञानस्या
नादित्वात् ॥ सा चांतःकरणवृत्तिरावरणाभिभवार्था इत्येकं मतं ॥ तथाहि ॥ अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठा
नचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तो घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतंत्रमव
स्यापदवाच्यमभ्युपगंतव्यं ॥ एवं सति घटादेर्न भानप्रसंगः ॥ अनावृतचैतन्यसंबंधस्यैव भानप्रयोजकत्वात् ॥ तस्य चा
वरणस्य सत्त्वात् न त्वेकदाचिदपि घटभानं न स्यादिति तद्भंगे वक्तव्ये तद्भंगजनकं न चैतन्यमात्रं ॥ तद्भासकस्य तदनिवर्तक
त्वात् ॥ नापि वृत्त्युपहितचैतन्यं परोक्षस्थलेपि तन्निवृत्त्यापत्तेरिति परोक्षवृत्तिव्यावृत्ता ॥ वृत्तिविशेषस्य तदुपहितचैतन्यस्य
वावरणाभंगजनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते ॥ संबंधार्था वृत्तिरित्यपरं मतं ॥ तत्राविद्योपाधिकोऽपरिच्छिन्नो
जीवः स च घटादिप्रदेशे विद्यमानोपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति ॥ घटादिना तस्य सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदांतपरिभाषा॰
२३

बंधाभावात्॥ तत्तदाकारवृत्तिदशायांतुभासयति॥ तदासंबंधसत्वात्॥ नन्वविद्योपाधिकस्यापरिच्छिन्नस्यजीवस्यस्वतएवसमस्तव
स्तुसंबद्धस्यवृत्तिविरहदशायांसंबधाभावाभिधानमसंगतं॥ असंगतत्वदृष्ट्याचसंबधाभावाभिधानेवृत्त्यंतरमपिसंबंधो
नस्यादितिचेन्न॥ उच्यतेनवृत्तिविरहदशायांजीवस्यघटादिनासहसंबंधसामान्यंनिषेधयामः॥ किंतर्हि घटभानप्रयोजक
संबंधविशेषं॥ सचसंबंधविशेषः॥ विषयस्यजीवचैतन्यस्यचव्यंग्यव्यंजकतालक्षणःकादाचित्कः तत्तदाकारवृत्तिनि
बंधनः॥ तथाहितैजसमंतःकरणंस्वछद्रव्यत्वात्॥ स्वतएवजीवचैतन्याभिव्यंजनसमर्थं घटादिकंनतथा॥ अस्वछद्रव्य
त्वात्॥ स्वाकारवृत्तिसंयोगदशायांतुवृत्त्यभिभूतजाड्यधर्मकतयावृत्त्युत्पादितचैतन्याभिव्यंजकनयोग्यताश्रयतयाचवृ
त्त्युत्पानानंतरंचैतन्यमभिव्यनक्ति॥ तदुक्तंविवरणे॥ अंतःकरणंहिस्वस्मिन्निवस्वसंसर्गिण्यपिघटादौचैतन्याभिव्यक्ति
योग्यतामापादयति॥ दृष्टंचास्वछद्रव्यस्यापिस्वछद्रव्यसंबधदशायांप्रतिबिंबग्राहित्वं॥ यथाकुड्यादेर्जलादिसंयोगद
शायांमुखादिप्रतिबिंबग्राहिता॥ घटादेरभिव्यंजकत्वंनप्रतिबिंबग्राहित्वं॥ चैतन्यस्याभिव्यक्तत्वंचतत्रप्रतिबिंबत्वं॥ ए
वंविधाभिव्यंजकत्वसिद्ध्यर्थमेववृत्तेरपरोक्षस्थलेबहिर्निर्गमनांगीकारः॥ परोक्षस्थलेतुवन्ह्यादेर्वृत्तिसंयोगाभावेनचैत
न्यानभिव्यंजकतयानापरोक्षत्वं॥ एतन्मतेविषयाणामपरोक्षत्वंचैतन्याभिव्यंजकत्वमितिद्रष्टव्यं॥ एवंजीवस्यापरिच्छि
न्नत्वेपिवृत्तेःसंबंधार्थत्वंनिरूपितं॥ इदानीं परिच्छिन्नत्वपक्षेसंबंधार्थकत्वंनिरूप्यते॥ तथाहि॥ अंतःकरणोपाधिकोजीवः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यचनघटाद्युपादानताघटादिदे शासंबंधात्॥किंतु ब्रह्मैवघटाद्युपादानंतस्यमायोपहितस्यसकलघटाद्यन्वयित्वात्॥अ
तएवब्रह्मणः सर्वज्ञता॥तथाचजीवस्यघटाद्यधिष्ठानब्रह्मचैतन्याभेदमंतरेणघटाद्यवभासासंभवेप्राप्तेतदर्थमासायचघटा
द्यधिष्ठानब्रह्मचैतन्याभेदसिध्यर्थंघटाद्याकारावृत्तिरिष्यते॥ननुवृत्त्यापिकथंप्रमातृचैतन्यविषयचैतन्ययोरभेदःसंपद्य
ते॥घटांतःकरणरूपोपाधिभेदेनतदवछिन्नचैतन्ययोरभेदासंभवात्इतिचेन्न॥वृत्तेर्बहिर्द्देशनिर्गमनांगीकारेणवृत्त्यं
तःकरणविषयाणांएकदेशस्थत्वेनतदुपधेयाभेदाभावस्यउक्तत्वात्॥एवमपरोक्षस्थलेवृत्तेर्मतभेदेनविनियोगउ
पपादितः॥इंद्रियाजन्यविषयगोचरापरोक्षांतःकरणवृत्त्यवस्थास्वप्नावस्थाजाग्रदवस्थाव्यावृत्त्यर्थंइंद्रियाजन्येति।
अविद्यावृत्तिमत्यांसुषुप्तौअतिव्याप्तिवारणायांतःकरणेति॥सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्थाजाग्रत्स्वप्न
योरविद्याकारवृत्तेरंतःकरणवृत्तित्वान्नतत्रातिव्याप्तिः॥अत्रकेचिन्मरणमूर्छयोरवस्थांतरत्वमाहुः॥अपरेतु
सुषुप्तावेवतयोरंतर्भावमाहुः॥तत्रतयोरवस्थात्रयांतर्भाववबहिर्भावयोस्तुंपदार्थनिरूपणेउपयोगाभावान्नतत्रप्र
यत्यते॥तस्यमायोपाध्यपेक्षयैकत्वंअंतःकरणोपाध्यपेक्षयाचनानात्वंव्यवह्रीयते॥एतेनजीवस्याणुत्वंप्र
त्युक्तं॥बुद्धेर्गुणेनात्मगुणेनचैवमाराग्रमात्रोह्यवरोपिदृष्टइत्यादौजीवस्यबुद्धिशरीरत्वाच्यांतःकरणपरिमाणोपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकपरिमाणाश्रयत्वात्॥ स च जीवः स्वयंप्रकाशः स्वप्नावस्थामधिकृत्यात्रायंपुरुषः स्वयंज्योतिर्भवतीति श्रुतेः॥ अनुभवरूप
श्च प्रज्ञानघन इति श्रुतेः॥ अनुभवाभिइति व्यवहारस्तु वृत्तिप्रतिबिंबितचैतन्यमादायोपपद्यते॥ एवं त्वंपदार्थो निरूपितः॥ ॥
अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यं अभिधीयते॥ ननु नाहमीश्वर इति प्रत्यक्षेण किंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धध
र्माश्रयत्वादिलिंगेन द्वासुपर्णेत्यादिश्रुत्या द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च॥ क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते
इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपो यजमानः प्रस्तर इत्यादिवाक्यवदुपचरितार्थ
मेवेति चेन्न॥ भेदप्रत्यक्षस्य संभावितदोषवेदजन्याभेदज्ञानेन बाध्यमानत्वात्॥ अन्यथा चंद्रगतताधिकपरिमाणग्राहिज्यो
तिःशास्त्रस्य चंद्रप्रादेशिकग्राहिप्रत्यक्षेण बाधापत्तेः॥ पाकरक्ते घटे रक्तो यं न श्याम इतिवत्सविशेषणे विधिनिषेधौ विशे
षणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायेन जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयकत्वाच्च॥
अत एव च नानुमानमपि प्रमाणं॥ आगमबाधात्॥ मेरुः पाषाणमयत्वानुमानवत्॥ नाप्यागमांतरविरोधः॥ तत्परातत्परवा
क्ययोः तत्परवाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादि द्वासुपर्णादिवाक्यापेक्षया उपक्रमोपसंहाराद्यवगताद्वैततात्प
र्यविशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वाच्च॥ न च जीवपरैक्ये पि विरुद्धधर्माश्रयत्वानुपपत्तिः॥ शीतस्यैव जलस्योपा
धिकौष्ण्याश्रयवत्॥ स्वभावतो निर्गुणस्यैव जीवस्यांतःकरणाद्युपाधिकृततदाश्रयत्वप्रतिभासोपपत्तेः॥ यदि च ज

करणदोषस्या
संभावित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लादौ भौ ह्यमारोपितं तद्दापकृतेपि तुल्यं॥ न च सिद्धांते कतत्वस्य क्वचिदप्यभावादारोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यं॥
लाघवेनारोप्यविषयकसंस्कारत्वेनैव तस्य हेतुत्वात्॥ न च प्राथिकारोपे का गतिः॥ कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्॥ तत्त्वंपदवाच्य
योरैक्यायोगेपि लक्ष्यस्वरूपयोरैक्यमुपपादितं॥ अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानां अखंडार्थत्वं सोयमित्यादिवाक्य
वत्॥ न च कार्यपराणामेव प्रामाण्यं॥ चैत्र पुत्रस्ते जात इत्यादौ सिद्धेपि संगतिग्रहात्॥ एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीतिहा
सपुराणप्रतिपाद्यं जीवपरैक्यं वेदांतशास्त्रस्य विषय इति सिद्धं॥ ॥वेदांतपरिभाषायां विषयपरिच्छेदः॥ ॥इदानीं प्रयो
वे जनं निरूप्यते॥ यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनं॥ तच्च द्विविधं मुख्यं गौणं चेति॥ तत्र सुखदुःखाभावौ मुख्यप्रयो
जनं॥ तदन्यतरसाधनं गौणप्रयोजनं॥ सुखं च द्विविधं॥ सातिशयं निरतिशयं चेति॥ तत्र सातिशयं सुखं विषयानुषंगज
नितांतःकरणवृत्तितारतम्यकृतानंदलेशाविर्भावविशेषः॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः॥
आनंदात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च ब्रह्मविद्ब्रह्मैव भवति तरति शोकमात्मविदिति श्रुतेः॥ न तु लोकांतरावाप्तिः
तज्जन्यवैषयिकानंदो वा मोक्षः॥ तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः॥ ननु त्वन्मतेप्यानंदावाप्तेरनर्थनिवृ
त्तेश्च सादित्वे तुल्यो दोषः॥ अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेन्न॥ सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्ष
स्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः॥ अनर्थनिवृत्तेरपि अधिष्ठानभूतब्रह्मस्वरूपतया सिद्धत्वाच्च॥ लोकेपि प्राप्तावा
प्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव॥ यथा हस्तगतविस्मृतसुवर्णादौ तव हस्ते सुवर्णमित्याप्तोपदेशादप्राप्तमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राप्नोति॥ यथा वा वलयितचरणायां स्रजि सर्पत्वभ्रमवतः नायं सर्प इत्याप्तवाक्यात्परिहृतस्यैव सर्पस्य परिहारः॥ एवं प्राप्तस्या
प्यानंदस्य प्राप्तिः परिहृतस्याप्यनर्थस्य निवृत्तिर्मोक्षः प्रयोजनं च॥ स च ज्ञानैकसाध्यः॥ तमेव विदित्वातिमृत्युमेति नान्यः पं
था विद्यतेयनायेति श्रुतेः॥ अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वाच्च तच्च ज्ञानं ब्रह्मात्मैक्यगोचरं॥ अभयं वै जनक प्राप्तोसि
तदात्मानमेवावेदहं ब्रह्मास्मीति श्रुतेः॥ तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदीयवचनाच्च॥ तच्च ज्ञान
मपरोक्षरूपं परोक्षत्वेऽपरोक्षभ्रमनिवर्त्तकत्वानुपपत्तेः॥ तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित्॥ मनननिदि
दंतःकरणा ध्यासनसंस्कृतादेव मनस इति परे॥ तत्र पूर्वाचार्याणामयमाशयः॥ संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबंधनं किंतु प्र
मेयविशेषनिबंधनमित्युपपादितं॥ तथा च ब्रह्मणः प्रमातृजीवाभिन्नत्वात्तद्गोचरं शाब्दं ज्ञानमप्यपरोक्षं
अत एव प्रतर्दनाधिकरणे प्रतर्दनं प्रति प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्वेतींद्रप्रोक्तवाक्ये प्राणशब्दस्य ब्र
ह्मपरत्वे निश्चिते सति मामुपास्वेत्यस्मच्छब्दानुपपत्तिमाशंक्य तदुत्तरत्वेन ~~तदुत्तरत्वेन~~ प्रवृत्ते शास्त्रदृष्ट्या तूपदेशो
वामदेववदिति सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिरिति तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं दृष्टिशब्देनोक्तमिति
अन्येषां त्वेवमाशयः॥ करणविशेषनिबंधनमेव ज्ञानानां प्रत्यक्षत्वं न विषयविशेषनिबंधनं॥ एकस्मिन्नेव सूक्ष्मव
स्तुनि पटुकरणापटुकरणयोः प्रत्यक्षाप्रत्यक्षत्वव्यवहारदर्शनात्॥ तथा च संवित्साक्षात्त्वे इंद्रियजन्यत्वस्यैव प्रयोज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कत्तयानशाब्दजन्यज्ञानस्यापरोक्षत्वं॥ब्रह्मसाक्षात्कारेपिमननंनिदिध्यासनसंस्कृतंमनएवकरणं॥मनसैवानुद्रष्टव्यमित्या
दिश्रुतेः॥मनोगम्यत्वश्रुतिश्चासंस्कृतमनोविषया॥नचैवंब्रह्मणःऔपनिषदत्वानुपपत्तिः॥अस्मदुक्तमनसःवेदजन्यज्ञाना
नंतरमेवप्रवृत्तत्तयावेदोपजीवित्वात्॥वेदानुपजीविमानांतरगम्यत्वस्यैववेदगम्यत्वविरोधित्वात्॥शास्त्रदृष्टिस्तूत्रमपिब्रह्म
विषयमानसप्रत्यक्षस्यशास्त्रप्रयोज्यत्वादुपपद्यते॥तदुक्तं॥अपिसंराधनेसूत्राच्छास्त्रार्थध्यानजाप्रमा॥शास्त्रदृष्टिर्मे
तातांतुवेत्तिवाचस्पतिःपरइति॥तच्चज्ञानंपापक्षयात्॥सचकर्मानुष्ठानादितिपरंपरयाकर्मणांविनियोगः॥अतएवतमे
तंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेत्यादिश्रुतेः॥कषायेकर्मभिःपक्वेततोज्ञानंप्रवर्त्तते
त्यादिस्मृतिश्चसंगच्छते॥एवंश्रवणमनननिदिध्यासनान्यपिज्ञानसाधनानि॥मैत्रेयीब्राह्मणेपिआत्मावाअरेद्रष्टव्य
इतिदर्शनमनूद्यतत्साधनत्वेनश्रोतव्योमंतव्योनिदिध्यासितव्यइतिश्रवणमनननिदिध्यासनानांविधानात्॥श्र
ता वणंनामवेदांतानांब्रह्मणितात्पर्यावधारणानुकूलामानसीक्रिया॥मननंनामशब्दावधारितेर्थेमानांतरविरोधशंकायां
तन्निराकरणानुकूलतर्कात्मकज्ञानजनकोमानसोव्यापारः॥निदिध्यासनंनामअनादिदुर्वासनयाविषयेष्वाकृ
ष्यमाणस्यचित्तस्यविषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलोमानसोव्यापारः॥तत्रनिदिध्यासनंब्रह्मसाक्षा
त्कारेसाक्षात्कारणं॥तेध्यानयोगानुगताअपश्यन्॥देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतेः॥निदिध्यासनेंव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२६॥ मननं हेतुः॥ अकृतमननस्य अर्थदार्ढ्याभावेन तद्विषयनिदिध्यासनायोगात्॥ मनने श्रवणं हेतुः॥ श्रवणाभावे तात्पर्यानिश्चयेन शाब्द
ज्ञानायोगेन श्रुतार्थविषययुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्॥ एतान्यपि त्रीण्यपि साक्षात्कारणानीत्येषां स्वातंत्र्यं
केचिदाचार्या ऊचिरे॥ अपरे श्रवणं प्रधानं॥ मनननिदिध्यासनयोस्तु श्रवणात्[illegible]चीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्त्ति
कतया आरादुपकारकांगत्वमित्याहुः॥ तदप्यंगत्वं न तार्तीयशेषत्वरूपं तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यभा
वेऽसंभवात्॥ तथाहि व्रीहिभिर्यजेत दध्ना जुहोतीत्यादाविव मनननिदिध्यासनयोरंगत्वेन कांचित्तृतीया श्रुतिरस्ति॥ नापि बर्हि
र्देवसदनं दामीत्यादिमंत्राणां बर्हिःखंडनप्रकाशनसामर्थ्यवत् किंचिल्लिंगमस्ति॥ नापि प्रदेशांतरपठितप्रवर्ग्यस्याग्निष्टो
मे प्रवृणक्तीति वाक्यवत्॥ श्रवणानुवादेन मनननविनियोजकं किंचिद्वाक्यमस्ति॥ नापि दर्शपौर्णमासाभ्यां स्वर्गकामो यजे
ग तेति वाक्यावगतफलसाधनभूतदर्शपौर्णमासप्रकरणे प्रयाजादीनामिव फलसाधनत्वेनावगतस्य श्रवणस्य प्रकरणे
मनननिदिध्यासनयोराम्नानं॥ ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति फलवत्तया श्रवणं प्रकरणि तत्सन्निधावाम्नातयो
र्मनननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादेवांगत्वेति चेन्न॥ तेध्यानयोगानुगता अपश्यन्नित्यादिश्रुत्यैव तरेध्यानस्यैव दर्शन ६
साधनत्वेनावगतस्यांगाकांक्षायां प्रयाजन्यायेन श्रवणमननयोरेवांगतापत्तेः॥ क्रमसमाख्ये च दूरनिरस्ते किंच प्रयाजा
द्यंगत्वविचारः सप्रयोजनः पूर्वपक्षे विकृतिषु न प्रयाजानुष्ठानं॥ सिद्धांते तु तत्रानुष्ठानमिति॥ प्रकृते श्रवणं न कस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारणता वि

त्प्रकृतिः॥ येनमननिदिध्यासनयोस्तत्राप्यनुष्ठानमंगत्वकारणविचारफलंभवेत्॥ तस्मान्नतार्तीयकशेषत्वंमनननिदिध्या
सनयोः॥ किंतुयथाघटादिकार्येमृत्पिंडादीनांप्रधानत्वेचक्रादीनांसहकारिकारणत्वेतिप्राधान्याप्राधान्यव्यपदेशः॥ तथाश्रवणम
नननिदिध्यासनानामपीतिमंतव्यं॥ सूचितंचेदंवरणाचार्यैः॥ शक्तितात्पर्यविशिष्टशब्दावधारणंप्रमेयावगमंप्रत्यव्यवधाने
नकारणंभवति॥ प्रमाणस्यप्रमेयावगमंप्रत्यव्यवधानात्॥ मनननिदिध्यासनेतुचित्तस्यप्रत्यगात्मप्रवणतासंस्कारपरि
निष्पन्नत्वदेकाग्रवृत्तिकार्यद्वारेणब्रह्मानुभवहेतुतांप्रतिपद्येते इतिफलंप्रत्यव्यवहितकरणविशिष्टशब्दावधारणस्यव्यवहि स्य
तमनननिदिध्यासनेतदंगेअंगीक्रियेते इति॥ श्रवणादिषुचमुमुक्षूणामधिकारः॥ काम्येकर्मणिफलकामस्याधिकारि
त्वात्॥ मुमुक्षूणांचनित्यानित्यविवेकस्यइहामुत्रार्थफलभोगविरागस्यशमदमोपरमतितीक्षासमाधानश्रद्धानांचविनि
योगः॥ अंतरिंद्रियनियहः शमः॥ बहिरिंद्रियनियहोदमः॥ विक्षेपाभावउपरतिः॥ शीतोष्णादिद्वंद्वसहनंतितीक्षा॥ चित्तैका
ग्र्यंसमाधानं॥ गुरुवेदवाक्यविश्वासःश्रद्धा॥ अत्रोपरमशब्देनसन्यासोभिधीयते॥ तथाचसन्यासिनामेवश्रवणाधि
कारइतिकेचित्॥ अपरेतुपरमशब्दस्यसन्यासवाचकत्वाभावाद्विक्षेपाभावमात्रस्यगृहस्थेष्वपिसंभवाज्जनकादे
रपिब्रह्मविचारस्यश्रूयमाणत्वात्॥ सर्वाश्रमसाधारणंश्रवणादिविधानमित्याहुः॥ सगुणोपासनमपिचित्तैकाग्र्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.01.20 11:49
,TRANSFERRED=2020/01/18 at 11:53:28
,PAGES=30
,TYPE=STD
,NAME=S0002558
,Book Name=M-2400-VEDANT PARIBHASHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection